# Shri Niladrinatha Vishnu Stuti

# શ્રીનીલાદ્રિનાથવિષ્ણુસ્તુતિઃ

## Document Information

Text title : Shri Niladrinatha Vishnu Stuti 03 17

File name : nIlAdrinAthaviShNustutiH.itx

Category : vishhnu, stuti

Location : doc_vishhnu

Proofread by : Rajesh Thyagarajan

Description/comments : From stotrArNavaH 03-17

Latest update : August 14, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 14, 2021

*sanskritdocuments.org*

# શ્રીનીલાદ્રિનાથવિષ્ણુસ્તુતિઃ

રક્તામ્ભોરુહદર્પભઞ્જનમહાસૌન્દર્યનેત્રદ્વયં
    મુક્તાહારવિલમ્બિહેમમકુટં રત્નોજ્જ્વલત્કુણ્ડલમ્ ।
વર્ષામ્ભોદસમાનનીલવપુષં અવેયહારાન્વિતં
    શઙ્ખચક્રધરં પ્રસન્નવદનં નીલાદ્રિનાથં ભજે ॥ ૧॥

નીલાદ્રૌ શઙ્ખખમધ્યે શતદલકમલે રત્નસિંહાસનસ્થં
    સર્વાલઙ્કારયુક્તં નવઘનરુચિરં સંયુતં જાગ્રતેન ચાગ્રજેન ।
ભદ્રા યદ્વામભાગે રથચરણયુતં બ્રહ્મરુદ્રેન્દ્રવન્ધં
    વેદાનાં સારમીશં સ્વજનપરિવૃત્તં બ્રહ્મદારં સ્મરામિ ॥ ૨॥

ઉદ્યન્નીરદનીલસુન્દરતનું પૂર્ણેન્દુબિમ્બાનનં
    રાજીવોત્પલપત્રનેત્રયુગલં કારુણ્યવારાન્નિધિમ્ ।
ભક્તાનાં સકલાર્તિનાશનકરં ચિન્તાર્તચિન્તામણિ
    વન્દે શ્રીપુરુષોત્તમ પ્રતિનિધિં નીલાદ્રિચૂડામણિમ્ ॥ ૩॥

ફુલેન્દીવરલોચનં નવઘનશ્યામાભિરામાકૃતિ
    વિશ્વેશં કમલાવિલોલવિલસત્પાદારવિન્દદ્વયમ્ ।
દૈત્યારિં કમલેન્દુમણ્ડિતમુખં શચક્રાબ્જહસ્તદ્વયં
    વન્દે શ્રીપુરુષોત્તમ પ્રતિનિધિં લક્ષ્મીવિલાસાલયમ્ ॥ ૪॥

સ્વપન રઙ્ગે જાયદ્યદુસરસિ તિષ્ઠન્ વૃષગિરૌ
    પ્રયાગે સમ્મજ્જન્નથ બદરભૂમીષુ ચ જપન્ ।
જગન્નાથે ભુઞ્જન્ શતપદમયોધ્યામધિવસન્
    સદા દ્વારાવત્યાં વિહરતિ સલીલં યદુપતિઃ ॥ ૫॥

કુન્દાભં દ્વિભુજ ત્રિભઙ્ગિલલિતં શાન્તં જટાકુશ્ચિત
    સ્તબ્ધોત્રમનિન્દિતાંસયુગલં પીતામ્પર સુન્દરમ્ ।
તાશ્વે ચ કટીતટે કુતકરદ્વન્દ્વં ત્રિનેત્રસ્થિતં
    સિંહાદ્રૌ શીઘ્રપાતક્ષિતિપિહિતપદઃ પાતુ માં નારસિંહઃ ॥ ૬॥

ઇતિ શ્રીનીલાદ્રિનાથ વિષ્ણુસ્તુતિઃ સમ્પૂર્ણા ।

Proofread by Rajesh Thyagarajan

*Shri Niladrinatha Vishnu Stuti*

pdf was typeset on August 14, 2021

Please send corrections to *sanskrit@cheerful.com*